CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharaja Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशायनमः॥विष्णुः३ श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमानस्यआद्य
ब्रह्मणोद्वितीयेपरार्धेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरेकालियुगेप्रथमचरणेजं
बूद्वीपेभारतवर्षेभारतखंडेआर्यावर्तैकदेशेअविमुक्तवाराणसीक्षेत्रेआनंदवनेम
हारुद्रमहाने गौरीमुखेत्रिकंटकविराजितेविक्रमार्कबोद्धावतारेभागीरथ्याः
अमुकसंवत्सरेअमुकअयनेऋतौमासिपक्षेतिथौवासरेनक्षत्रेचंद्रेसूर्य
गुरौशेषेषुग्रहेषुयथायथास्थानस्थितेषुसत्सुयोगेकरणएवंगुणविशेषणवि
शिष्टायांपुण्यतिथौश्रीपरमेश्वरप्रीत्यर्थंप्रातस्नानमहंकरिष्ये॥तत्संकल्प्यवरु
णंसंप्रार्थ्यहिरण्यभृंगंवरुणंअपघेतीर्थंमेदेहियाचितः।यन्मयाभुक्तमसाध्वनंपा
पेभ्यश्चप्रतियहः।यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं।तन्नइद्रोवरुणोबृहस्पतिः
सविताचपुनःपुनः॥याःप्रवतोनिवतउदन्वतीरनुदकाभ्ययाः।ताअस्मभ्यं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पयस्वापिन्वमानाः शिवादेवीरशिपदाभवंतु सर्वान्नोअंहसोमुंचंतु॥इमंमेगंगे
यमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्यामरुद्वृधेवितस्तयार्जीकीये
शृणुह्यासुषोमया॥सिनासितेसरितेयत्रसंगथेतत्रप्लुतासोदिवमुत्पतंति॥एवैन
न्वविसर्जंतिधीरास्तेजनासोअमृतत्वंभजंते॥इततीर्थमभिमृश्यकेशान्पुरतः कृ
त्वायथायथंन्यवाहघाघ्रमुखः स्नात्वाहिरण्मयअपोहिष्ठेतिमार्जनंकुशैर्नवभिः कृत्वा
आपोहिष्ठेतितिसृभिर्जलमभिमंत्र्यांगुष्ठेनमेगंगेइतितिसृभिरदक्षिणमालोड्यप्रकाश
पृष्ठमग्नेसन्नृतंचेतित्रिरावृतेनाघमर्षणंकृत्वात्रिराचम्यसाक्षान्नृतंचे
तित्रचस्यमधुछंदसोअघमर्षणऋषिःभाववृतदेवताअनुष्टुप्छंदःअघमर्षणवि
नियोगः॥ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत।ततोरात्र्यजायततःसमुद्रोअर्ण
वः।समुद्रार्णवादधिसंवत्सरोअजायत।अहोरात्राणिविदधद्विश्वस्यमिषतोवशी।सू

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

र्यचंद्रमसौधातायथापूर्वमकल्पयत्।दिवंचपृथिवींचांतरिक्षमथोस्वः।।अघमर्षणंकृत्वा
त्रिरापुस्पृस्याक्षतामिरङ्गिः प्राङ्मुखउपवीतीदेवतीर्थेन ब्रह्मादयोयेदेवातांदेवांस्तर्पया
मि।भूर्देवांस्तं भुवर्देवांस्तं स्वर्देवांस्तर्प० भूर्भुवस्वर्देवांस्तं मीत्येकैकमंजलिंगोशृंगमात्र
मुदकंदद्यात् ततोनिवीत्यदक्षिणस्वः सव्यवामिरङ्गिः कृष्णद्वैपायनोदयोयेऋषयःता
न्ऋषीस्तर्पयामि।ऋं भूरृषीस्तं भुवरृषी स्वरृषीं० भूर्भुवस्वरृषीं० इति द्वौद्वावंजलिंद
त्वातीर्थेनपूर्ववदुत्वाप्राचीनावीतीदक्षिणामुखः सतिलाभिरङ्गिः सोमःपितृमान्यमोऽ
गिरस्वान्नग्निष्वात्ताः कव्यवाहनादयोयेपितरस्तान्पितॄन्स्तर्प० भूःपितॄंस्तं भुवःपितॄं
स्वःपितृ० भूर्भुवस्वःपितॄंस्तर्पयामीतित्रीन्त्रींजलीन्पितृतीर्थेनत्वोद्वे।असंस्कृतान्प्र
मीतानांतटेरुजलंजलिंअग्निदग्धाश्चयेजीवाबेप्यदग्धाःकुलेनमे।भूमौमोदत्तेन
तोयेनतृप्तायंतुपरागतिं।।इतिमंत्रेणदद्यात्।। ततोजलाद्बहिर्वासःपीडनिधायोपवीत्यार्द्र

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

म्यायन्मयादूषितं तोयं शारीरमलसंभवात्। आत्मन्येतद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहमिति यक्ष्माणं तर्पयित्वा तीरमेत्य दक्षिणेसुरवएवप्राचीनावीतीयेकेचास्मत्कुलेजाता अपुत्रागोत्रिणोमृताः। तेषां कृतमयादत्तंवस्त्रनिष्पीडनोदकं इतिमंत्रेणपरिहितवस्त्रंनिष्पी ड्यउपवीत्यपउपस्पृश्यस्नानवासोतिरिक्तवासस्साअंगानिमार्जयित्वासोत्तरीयंवासोपरिधृत्वाद्विराचम्यस्वस्तिकादिधृत्वासंध्यांकुर्यात्। तत्रप्रयोगः॥ तत्रप्रयोगः॥अंतर्जानुमज्जलं केशवायनमः॥नारायणायनमः॥माधवाय॰त्रिभिर्मंत्रैस्त्रिभिःपीत्वा॰गोविंदविष्णुभ्यांहस्तौ प्रक्षाल्य॰मधुसूदन॰त्रिविक्रम॰द्वाभ्यामोष्ठौसंमृज्य॰वामन॰श्रीधर॰द्वाभ्यांमुखमवाकिरं मृज्य॰हृषीकेशाय॰वामकरंप्रक्षाल्य॰पद्मनाभ॰पादौप्रक्षाल्य॰दामोदर॰शिरःसंकर्षण॰ ऊर्ध्वंशुष्कंत्यजेः॰वासुदेव॰प्रद्युम्न॰द्वाभ्यांदक्षिणवामनासारंध्रेणअंगुष्ठतर्जनी भ्यां॰अनिरुद्ध॰पुरुषोत्तम॰द्वाभ्यांदक्षिणवामनेत्रेअंगुष्ठनामिकाभ्यां॰अधोक्षज॰नारसिं॰ द्वाभ्यांदक्षिणवामश्रोत्रेअंगुष्ठकनिष्ठिकाभ्यां॰अच्युताय॰नाभितोभ्यामव॰जनार्दन॰हृत्क

Kashi Maharani Collection, Rammagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रतलेन उषेंद्रेतिशिरोंगुल्यग्रैः हरिकृष्णेतिद्वाभ्यांस्वंगुल्यग्रैर्दक्षिणवामबाहूस्पृशेत्॥
इतिद्विराचम्यवक्ष्यमाणदिशाप्रथममंत्रकंप्राणायामत्रयंकृत्वाततःसमंत्रकंकुर्यात्इदं
गंधपरिशिष्टंसचंदनवस्यपरब्रह्मऋषिःपरमात्मादेवतादैवीगायत्रीछंदःव्याहृतीनां सप्तानां
विश्वामित्रभरद्वाजवसिष्ठगोतमकश्यपांगिरसाऋषयः।अग्निवायुसूर्यवाजापतया
देवताःगायत्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांसिःगायत्र्याविश्वामित्रःसवितागा
यत्रीछंदःशिरसःप्रजापतिर्ऋषिःब्रह्माग्निवाय्वादित्यादेवताःयजुश्छंदःप्राणायामेविनि
योगःदक्षनासापुटमध्यमातर्जनीरहितांगुलीभिर्नासिकामादायवामनासारंध्रेणवायुमा
कृष्य।ॐभूःॐभुवःॐसुवःॐमहः ॐजनःॐतपःॐसत्यंॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्।ॐआपोज्योति
रसोमृतंब्रह्मभूर्भुवस्सुवरोंइतित्रिःपठित्वादक्षिणनासारंध्रेणशनैर्वायुंविसृजेत्॥इतिप्रा
णायामंकृत्वाउपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसंध्यामुपासिष्येइतिसंकल्प्य
आपोहिष्ठेतितृचस्यांबरीषःसिंधुद्वीपऋषिःआपोदेवतागायत्रीछंदःमार्जनेविनियोगः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ॐ आपोहिष्ठामयोभुवः। तानऊर्जेदधातन। महेरणाय चक्षसे। योवः शिवतमोरसः। तस्यभा
जयतेहनः। उशतीरिवमातरः। तस्माअरंगमामवः। यस्यक्षयायजिन्वथ। आपोजनयथाचनः।
सप्रणवेनविनिःपादेमर्जियेत। सूर्यश्चेतिमंत्रस्ययाज्ञवल्क्यऋषिः सूर्योमन्यु
र्मन्युपतयोरात्रिश्चदेवताः गायत्रीपंक्तिर्विराजश्छंदांसिमंत्राचमनेविनियोगः। सूर्यश्चे
मामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः पापेभ्योरक्षंतां। यद्यह्नापापमकार्षं। मनसावाचा
हस्ताभ्यांपद्भ्यामुदरेणशिश्ना। रात्रिस्तदवलुंपतु। यत्किंचदुरितंमयि। इदमहंमामृत
योनौ। सूर्येज्योतिषि। जुहोमिस्वाहा। इत्यपः प्राश्यद्विराचम्य। आपोहिष्ठेतिनवर्चस्य
सूक्तस्यांबरीषः सिंधुद्वीपऋषिः आपोदेवताः गायत्रीछंदः पंचमीवर्धमाना। सप्तमी
प्रतिष्ठा। अंत्येद्वेअनुष्टुभौ। मार्जनेविनियोगः। आपोहिष्ठा।३।शंनोदेवीरभिष्टय आपोभवंतु
पीतये। शंयोरभिस्रवंतुनः। ईशानावार्याणांक्षयंतीश्चर्षणीनां। अपोयाचामिभेषजं।उ
शुमेसोमोअब्रवीदंतर्विश्वानिभेषजा। अग्निंचविश्वशंभुवं। आपःप्रणीतभेषजंवरू

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यंतन्वे३मम। ज्योरुचस्पर्यदृशे। दृप्तापः प्रवहतयत्किंचदुरि तंमयि। यद्वाहमभिदुद्रोहयद्वाशे
पउतान्तंत। आपोअद्यान्वचारिषंरसेनसमगस्महि। पयस्वान्नआगहि तंमासंस्रजवर्चसा।
रुगंतेमार्जनंकुर्यात्। ऋतंचेतित्रचस्यमधुछंदसोअघमर्षणऋषिःभावृत्तंदेवता।
अनुष्टुप्छंदः।अघमर्षणेविनियोगः। ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत। ततोरात्र्यजाय
ततःसमुद्रोअर्णवः। समुद्रादर्णवादधिसंवत्सरोअजायत। अहोरात्राणिविदधद्वि
श्वस्यमिषतोवशी। सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्। दिवंचपृथिवींचांतरिक्षमथो
करस्थजलंवामभागेभूमौक्षिप्त्वाचस्यदर्भपाणिःपूर्णमुदकांजलिंमूर्ध्वादित्याभिमुख
स्थित्वा। गायत्र्याविश्वामित्रःसवितागायत्री। सूर्यार्घेप्रदानेविनियोगः। ओं भूर्भुवःस्व
इत्यृचार्यं आधारमंडलस्थज्योतिर्विग्रहंअंजलिपुटप्रतिदक्षिणनासापुटेनआकृष्यपा
भाव्यतत्रेमंदेहासुरनिबर्हणार्थंजलांजलिनासहक्षिपामीतिभावयन्जलमुत्क्षिपेत्। ओं
सूर्यायेदमर्घ्यंनममेतिसूक्तं। आपोज्योतीरसोम्रुतं ब्रह्मभूर्भुवस्वरोमितिमंत्रेणपुनस्तत्तेजो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वामनास्रापुटेनस्वस्मिन्क्षापयेत् ॥इतिशोधनकः॥एवंत्रिरभ्यर्निवेधदक्षिणपाणिगृही
तजलेनअसावादित्योब्रह्मेतिमंत्रेणप्रदक्षिणंपरिषिच्यात्मानंपरिषिच्यद्विराचम्यशुचि
देशेकुशोदकोक्षितेकुशानास्तीर्यभूर्भुवस्वरित्यपविश्यपूर्ववत्प्राणायामत्रयंकृत्वाआ
त्मानंभूर्भुवस्वरित्यभ्युक्ष्यगायत्र्याविश्वामित्रऋषिःसवितादेवतागायत्रीछंदःश्वेतोवर्णः
अग्निर्मुखंब्रह्मशिरःविष्णुर्हृदयंरुद्रोललाटंपृथ्वीकुक्षिःत्रैलोक्यंचरणाःसांख्याय
नंगोत्रंत्रिपदागायत्रीअशेषपापक्षयार्थेअष्टोत्तरशतसंख्यागायत्रीजपंकरिष्येइतो
सकन्यएवंवत्पुनर्भार्गायत्र्याऋष्यादीननुस्मृत्यतत्सवितुर्हृदयायवरेण्यंशिरसेस्वा
हाभर्गोदेवस्यशिखायैवमूधीमहिकवचायहुंधियोयोनःनेत्रत्रयायवौषट्प्रचो
दयात्अस्त्रायफट्इतिकरतलेनाद्याद्दिशोदिक्षन्यसेदित्यंगन्यासंकृत्वाकृत्यावा
त्मानंतद्रूपंभावयेत्ततोमंत्रदेवतांध्यात्वाआगच्छवरदेदेविजपेमेसन्निधोभवगायं
तंत्रायसेयस्माद्गायत्रीत्वंततस्मृतस्त्यावाहयतिष्ठन्नर्धनक्षत्रेषुआमंडलद

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

र्शनात्सवितुर्देवस्यवरेण्यंतत्तेजः ध्यायेन्मयास्माकं कर्माणिप्रेरयतीत्यर्थमनुसंधा
नः॥ बालां बालादित्यमंडलमध्यस्थां रक्तवर्णां रक्तांबरानुलेपनस्रगाभरणांचतुर्बाहुं
दंडकमंडल्वक्षसूत्राभयांकचतुर्भुजां हंसास्यनास्तां ब्रह्मदेवत्यां ऋग्वेदमुराहरंतीभू
र्लोकाधिष्ठात्रीं गायत्रीनामदेवतांध्यात्वाप्रणवव्याहृतिपूर्विकांसावित्रीऋचंसंस्मृत्यां
वस्त्राछन्नहस्तोजपेत्॥ ततःपूर्ववत्षडंगन्यासंविधाय जातवेदसेऽश्वपोजातवेदा
ग्निर्देवस्त्रैष्टुभंध्यानंविनियोगः॥ ॐ जातवेदसेसुनवामसोममरातीयतोनिद
हातेवेदः॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ तेछंयोः शंचविश्वेदे
वाः शकरीसंध्योपस्थानेविनियोगः॥ तच्छंयोरावृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदेवीस्वस्तिरस्तुनश्च
स्तिर्मानुषेभ्यः॥ ऊर्ध्वंजिगातुभेषजं॥ शन्नोअस्तुद्विपदेशंचतुष्पदे॥ नमोब्रह्मणइतिस
ध्यामुपस्थायमित्रस्येतिचतस्रोगाथाविश्वामित्रऋषिःमित्रोदेवतागायत्रीछंदःमित्रोपस्था
नेविनियोगः॥ ॐ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि॥ द्युम्नंचित्रश्रवस्तमं॥ आमा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding for MSS by Grant-in-

महिनादिवंमित्रोबभूवसप्रथाः॥अमिश्रवोमित्रःपृथिवी॥मित्रायपंचयेमित्रेजनाअ
मित्रिशवसे॥सदेवान्विश्वान्बिभर्ति॥मित्रोदेवेषायुषुजनायवृक्तबर्हिषि॥इषद्
वृत्रताअकः॥आदित्यमुपस्थायप्राच्येदिशेइंद्रायनमः॥आग्नेय्येदिशेआग्नयेनमः
दक्षिणस्यैयमायनैर्ऋत्येदिशेनिर्ऋतयेप्रतीच्यैदिशेवरुणायवायव्येदिशेवाय
वेउदीच्येदिशेसोमायऐशान्येदिशेईश्वरायऊर्ध्वायदिशेब्रह्मणेअधरायैदिशे
अनंतायइतिसाधिपादिशोनत्वासंध्यायैनमः।सावित्र्यैसरस्वत्यैसर्वाभ्योदेवताभ्यो
नमोनमःउत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि॥ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासु
खमितिसंध्यांविसृजेत्सोअपिवातयमनइतिपठित्वाशांतिःउन्निरुच्यार्यप्रदक्षिणंपरि
क्रमन्आसत्यलोकादायातादालोकालोकपर्वतात्येसंतिब्राह्मणादिवास्तेभ्योन्नि
त्यन्नमोनमःइतिनमस्कृत्यस्वगोत्रनामोच्चार्यहंभोअभिवादयेइतिस्वाभ्यांकर्णौस्पृश्य
पादौभूमिंचस्पृशन्अभिवाद्यगुरवेदीभ्यनत्वाअभिवादयेदितिप्रातःसंध्यासमे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पतः विस्तारस्तु ग्रंथांतरेनुसंधेयः ॥ अथ मध्याह्नसंध्या तत्र पूर्ववद्विराचम्य प्राणानायम्य मम उपात्तेत्यादि मध्याह्नसंध्यामुपाशिष्ये इति संकल्प्य पूर्ववन्मार्जनं कृत्वा आपः पुनंत्वित्यस्य नारायण ऋषिः आपो देवता अष्टी छंदः मंत्राचमने विनि० आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां पुनंतु ब्रह्मणस्पतिः ब्रह्मपूता पुनातु मां यदुच्छिष्ट म्यं यद्दुश्चरितं मम सर्वं पुनंतु मामापो सतां च प्रतिग्रहं स्वाहेत्यपः पीत्वा द्विरा म्यद्भिरीचेम्यं यमार्जनाघमर्षणं कृत्वा हंसः शुचिषदितिमंत्रस्य गोतमो वामदेव ऋषिः सूर्यो देवता जगती छंदः सूर्यार्घ्यदाने विनियोगः ॐ हंसः शुचिषद्वसुरंतरिक्ष सद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं ॥ आकृष्णेनहिरण्यस्तूपः सवितानि दृप् सूर्यार्घ्यप्रदाने० आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतंमर्त्यंच ॥ हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन् इति त्रिः सकृद्वार्घ्यदत्वा चैवं कुरुष्व कुरुते यं कण्वः प्रस्कण्वः सूर्यो नवार्घगायत्रो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

याभ्यतस्रोनुष्टुभोत्यस्त्रोरोगघ्नउपनिषत्। सूर्योप॰ॐ उदुत्यंजातवेदसंदेवंवहंतिके
तवः।दृशेविश्वायसूर्यं॥अपत्येतायजीयथानक्षत्रायंत्यक्तुभिः।सूरायविश्वचक्षसे।अदृश्र
मस्यकेतवोविरश्मयोजनाँअनु।भ्राजंतोअग्नयोयथा।तरणिर्विश्वदर्शतोज्योतिष्कृद
सिसूर्य।विश्वमाभासिरोचनं।प्रत्यङ्देवानांविशःप्रत्यङ्देविमानुषान्।प्रत्यङ्विश्वंस्व
र्दृशे॥१॥येनापावकचक्षसाभुरण्यंतंजनाँअनु।त्वंवरुणपश्यसि।विधामर्षिरजस्रधृ
हामिमानोअक्तुभिःपश्यंजन्मानिसूर्य।सतोमहरितोरथेवहंतिदेवसूर्य।रोचिषं
शंविचक्षण॥अयुक्तसप्तशुंध्युवःसूरोरथस्यनप्तयः।ताभिर्याति स्वयुक्तिभिः॥उद्वयं
मस्यस्परिज्योतिष्पश्यंतउत्तरं।देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं।उद्यन्नद्यमित्रहम
आरोहन्नुत्तरांदिवं॥दृशेगंममसूर्यहरिमाणंचनाशय।शुकेषुमेहरिमाणंगवीष्यो
कासुदध्मसि।अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि।उदगादयमादित्योविश्वेनसहसा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सह। द्विषंतमध्यरंधयन्मोअहंद्विषतेरधं॥२॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः।आप्राद्यावापृथिवी
सूर्यआत्माजगतस्तस्थुषश्चसूर्योदेवीमुषसंरोचमानामर्योनयोवामभ्येति
पश्चात्।यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं।भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः॥नमस्यंतोदिवआपृथिव्यैमस्यूःपरिद्यावापृथिवीयातिसद्यः।तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्वितंसंजभार।यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै।तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे।अनंतमन्यद्उशदस्यपाजःकृष्णमन्यद्हरितःसंभरंति।अधारवाउदितोसूर्यस्यनिरहसःपिपृतानिरवद्यात्।तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः॥३॥तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्।पश्येमशरदःशतंजीवेमशरदःशतंशृणवामशरदःशतं।प्रब्रवामशरदःशतं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पत्न्यासीनःअङ्गादिपूर्ववाहिरा चम्प धाययुवतीपूर्वादित्यमंडलमध्यस्थांश्वेतवर्णांश्वे
तांबरानुलेपनरत्नाभरणांपद्मवक्त्रांत्रिनेत्रांचंद्रशेखरांत्रिशूलवज्रखड्गांकुशधरांकांक
चतुर्भुजांवृषभासनारूढांरुद्रदेवत्यांयजुर्वेदमुदाहरंतीभुवर्लोकाधिष्ठात्रीसावित्रीनाम
देवतींध्यात्वाप्रर्ववज्जपंविधायजुडंकुर्यादितिगंधपरिशिष्टधनुसारेणप्रातर्ध्या
नसंध्येततोब्रह्मयज्ञतर्पणंकुर्यात्।तत्कोयंघपिमध्याह्नसंध्योत्तरंस्मृत्याद्यक्तस्त
थापिवृत्तिश्चरत्यन्यदपिभवति।तेनप्रागग्रेषुदर्भेषुउपविश्यप्राणायाममंत्रंदेशकालौसं
कीर्त्यममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंब्रह्मयज्ञंकरिष्ये इतिसंकल्प्यापो
स्पृष्ट्वासव्यंपाणिंप्रागुत्तानंनिधायतस्मिन्पवित्रेप्रागग्रेनिधायदक्षिणंपा
णिमंगुष्ठेनप्रागुत्तरेणसंदधात्।।ततोधावादाथिव्योःसंधिमीक्षमाणोनिमीलिताक्षोवा
सूक्ताद्यन्यतमंयथादृष्टंजपेत्तदभिसंधायप्रणवस्यब्रह्मऋषिर्देवतागायत्रीछंदः परमात्मा
व्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्हतीगायत्र्याविश्वामित्रःसवितागायत्री अग्नि

Kashi Maharani Collection, Rammagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मीढे इत्यादीनां छंदऋष्यादिसामर्थ्यछंदर्षयऋषयः। अग्न्याद्यो देवताः गायत्र्यादीनि छंदांसि
यथाशक्ति ब्रह्मयज्ञजपे विनियोगः। ॐ भूर्भुवस्वरितिसवितुर्वरेण्यं तत्सवितुर्वरेण्यं भर्गो
देवस्यधीमहि धियोयोनःप्रचोदयात्। तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि धियोयोनःप्र
चोदयात्। तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात्। ॐ अग्निमीळे
तिसृभिर्यथाशक्तिऽन्यदपियथोपकाशंपठित्वा नमोब्रह्मणेनमोअस्त्वग्नयेतिजिःपठे
त्। एवंब्रह्मयज्ञंकृत्वासाक्षताद्विरुद्धिः सव्यान्बाह्वथदक्षिणपाणिना ब्रह्मातृप्यतां
ब्रह्मातृप्यतु। वेदास्तृप्यंतु। देवास्तृप्यंतु। ऋषयस्तृप्यंतु। सर्वाणिछंदांसितृप्यंतु। ॐ कारस्तृ
प्यतु। वषट्कारस्तृप्यतु। व्याहृतयस्तृप्यंतु। सावित्रीतृप्यतां। यज्ञास्तृप्यंतां। द्यावापृथिवीतृप्यंतां। अंतरिक्षतृ
अहोरात्राणितृप्यंतां। संध्यास्तृप्यंतां। सिद्धास्तृप्यंतु। समुद्रास्तृप्यंतु। नद्यस्तृप्यंतु। गिरयस्तृप्यंतु। क्षे
त्रौषधिवनस्पतिगंधर्वाप्सरसस्तृप्यंतु। नागास्तृप्यंतु। वयांसितृप्यंतु। गावस्तृप्यंतु। सा
ध्यास्तृप्यंतु। विप्रास्तृप्यंतु। यक्षास्तृप्यंतु। रक्षांसितृप्यंतु। भूतानितृप्यंतु। एवंमेतानितृप्यंतु।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एकोनत्रिंशन्मंत्रैः कुशाग्रैर्देवतीर्थेनैकैकमंजलिंदद्यात् एवंदेवतर्पणं कृत्वाततोनिवीतीउप
ऋषयःसंवर्ताग्निरङ्गिः प्रतर्दनस्तृप्यंतु मांधात्रस्तृप्यंतु गत्समदस्तृप्यंतु विश्वामित्रस्तृ
वामदेवस्तृ अत्रिस्तृ भरद्वाजस्तृ वसिष्ठस्तृ प्रगाथास्तृप्यं पावमान्यस्तृप्यंतु क्षुद्रसू
क्तास्तृप्यं महासूक्तास्तृप्यंतु इतिद्वादशमंत्रैः कुशाग्रैर्ऋषितीर्थेनैकैकांजली
दद्यात् एवमृषीस्तर्पयित्वाप्राचीनावीतीदक्षिणामुखोन्वायितसव्यजानुः सप्तितामि
र्ऋक्षिः सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु० जानं
तिबाहविगार्ग्यगोतमशाकृत्यवाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु गार्ग्यश्चवाच क्रवीत्० वाड
वाप्रातीथेयौत्० सुरुभामैत्रेयीत्० कुहोलंतर्पयामि० कोषीतकंतर्पयामि महाकौषीतकं० पैग्यं
महापैग्यं सुयज्ञं० सांख्यायनं० ऐतरेयं० महैतरेयं० शाकलं० बाष्कलं० सुजातवक्त्रं०
औदवाहिंत० महौदवाहिंत० स्वौजामिं० शौनकं० आश्वलायनं० येचान्येआचार्यास्तेस

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेत्यंतेति त्रयोविंशतिमंत्रैर्दक्षिणाभुग्नकुशमूलाभ्यां पित्तीर्थेनञ्जलौ स्त्रीनञ्जलीन्
त्राऽअस्मत्पितरंगोत्रंशर्माणंरूपंस्वधानमस्तर्पयामि. इत्यादिप्रकारेणस्त्रीनञ्जलीन्
दद्यात्. एकैकंयथायथंपितामहप्रपितामहमात्पितामहीप्रपितामहीस्वपत्नीमातृ
मातामहमातुःपितामहमातुप्रपितामहतत्स्त्रीस्वपत्नीपुत्रादिपित्व्यमातृव्यभ्रातृस्व
पत्नीकपित्वस्रस्मात्वस्रस्वस्रसधवतनयश्वशुरसपत्नीकाचार्यसपत्नीकशिष्या
दीधद्यात्. तत्रपित्व्यादीनामेकैकांजलिःसपत्नमात्रादीनांतुद्वौद्वौतंजलिमंत्रावृ
त्तिः. मातामह्यादीनांपित्व्यादिपत्नीनांचैकैकमेवदद्यात्. पित्वस्रस्राद्युपित्वस्रसावं
काश्यपगोत्रांगंगादेवसुरूपांसधवांसापत्यामित्यादिप्रयोगवाक्यमनुसंधेयं. ततआ
ब्रह्मस्तंबपर्यंतंजगत्प्यतीतिमंत्रेण. आब्रह्मस्तंबपर्यंतंदेवंजगत्प्यतृप्यंतामयं
दत्तेनतोयेनतृप्तायांतुपरागतिमितिमंत्रेणवाआब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तृप्यंतु पितरः सर्वे मातृमातामहादयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनां। आब्र
ह्मभुवनाल्लोकान्नदमस्कृतिमोदकं। इतिमंत्रेणवाग्नींजलंदद्यात्ततआचम्य। येषांपिता
नचभ्रातापुत्रोनान्यत्रगोत्रिणः॥तेसर्वेतृप्तिमायांतुमयोत्सृष्टैःकुशैस्तवेतिमंत्रेणतत्तोयं वा
हस्तेविसर्जनंकुर्यात्। ततोयकेचास्मदितिमंत्रेणवस्त्रंनिष्पीडनंभूमौकुर्यात्। ततः नमो
विश्वतोब्रह्मन्भास्वतेविष्णुतेजसे। जगत्सवित्रेशुचयेसवित्रेकर्मदायिने इतिपुष्पपुराणो
क्तमंत्रेणसूर्यायार्घंदद्यात् इतिसंक्षेपः इतितर्पणं॥ ॥अथसायंसंध्या। प्रातःसंध्यावत्॥
विशेषस्तूच्यते। सायंसंध्यामुपाशिष्येइतिसंकल्पे। अग्निश्चेतिमंत्रस्यवसिष्ठ
ऋषिः॥अग्निमन्युर्मन्युपतयोदेवताः गायत्रीपंक्तिर्विराज्छंदांसि। मंत्राच्० अग्निश्च
मामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः॥पापेभ्योरक्षंतांयद्रात्र्यांदुष्कृतंपापेभ्योरक्षंतांतत्सर्वं
मनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना अहस्तदवलुंपतु। यत्किंचेदमितिमयि इद

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

महंमामरुत्योनोसलज्योतिर्जुहोमिस्वाहेतिमंत्राचमने॰ वृद्धंवृद्धादित्यमंडलमध्यस्थां
श्यामवर्णांश्यामांबरानुलेपनत्वगाभरणानेकवक्त्रांशंखचक्रगदापद्मांकचतुर्भुजांग
रुडासनस्थांविष्णुदेवत्यांसामवेदमुदाहरंतींस्वर्लोकाधिष्ठात्रीसरस्वतींनामदेवतांचिंते
यामि॥इतिध्यानं॰ अर्धास्तमितेमंडलआनम्रदर्शनाद्वायव्याभिमुखआसीनोजपेदि
जपेत्॰संध्योपस्थानांतेइममेवरुणेतत्वायामीत्यृचोआजीगर्तिःशुनःशेपस्यर्षिः॰वरुणो
देवताआद्यागायत्रीद्वितीयानिष्टुप्॰वरुणोपस्थाने॰॥इममेवरुणश्रुधीहवमुद्याचमळ
म्यात्वामवस्युराचकेतत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॰अहेळमा
नोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥इतिवरुणंउपस्थायदिक्नमनादिप्रांतः
नोवरुणेहमाबोध्युरुशंसमानआयुःप्रमोषीः॥इतिवरुणंउपस्थायदिक्नमनादिप्रांतः
संध्यावंदनंसमाप्तं॥ ॥इतिआपस्तंबसंध्यासमाप्ता॥ ॥
संध्यावंदनंसमाप्तं॥ ॥इतिआपस्तंबसंध्यासमाप्ता॥ ॥

॥श्रीगणेशा॥

ॐ ॐनामासीधं ॐ ॥श्रीगणेशायनमः॥ ॥श्रीगणेशायनमः ॐ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi